वर्सामायुवोनेष्टः सचन्त धेनवः” ऋ०२,५,५। “आयुवो-गन्वयः” भा० उवङ् छान्दसः “अभि सोमास आयवः पवन्ते मद्यं मदम्” ऋ० ९,२३,४। २आयुषि न० “कालः-क्रीड़ति गच्छत्यायुरित्युक्तेः कालगत्यैव तस्य गामित्वात्तथा-त्वम्। जीवनस्य कालरूपत्वे तु कालस्य सततगामित्वात्तथात्वं युक्तमेव “अग्ने जरस्व स्वापत्य आयुन्यूर्ज्जा” ऋ०२,२,७। “वत्सं न पूर्व्वं आयुनि जातं रिहन्ति मातरः” ऋ० ९,१००,१ आयुनि आयुषि” भा० बाहुलकात् भाषा-यामपि उण् उज्ज्व०। तेन “वायुना जगदायुना” वर्णि-विवेकः। “मा बधिष्ठा जटायुं माम्” भट्टिः। ‘तटीं विन्ध्यस्याद्रेरभजत जटायोः प्रथमजः” इति अभिनन्दः।

**आयुक्त** त्रि० आ+युज-कर्म्मणि क्त। १सम्यग्व्यापारिते। “आयुक्तकुशलाभ्याञ्चासेवायाम्” पा० “आयुक्तः व्यापा-रितः” सि०कौ०। ‘कुशलोऽन्येषणस्याहमायुक्तो दूत-कर्म्मणि” भट्टिः २ईषद्युक्ते च “आसेवायां किम्? आयुक्ता गौः शकटे ईषद्युक्तः” सि०कौ०। भावे क्त। ३सम्यग्नियोजने न०। आयुक्तमनेन इष्टा०इनि। आयुक्ती सम्यग्नियोजनकर्त्तरि त्रि० स्त्रियां ङीप्।

**आयुध** न० आयुध्यतेऽनेन आ+युध-करणे घञर्थे क। शस्त्रमात्रे। तस्य भेदाः समासतस्त्रिधा प्रहरणहस्तमुक्त यन्त्रमुक्तभेदात्। तत्र हस्तस्थितैर्यैः प्रक्षिप्यते तानि प्रह-रणानि यथा खड्गादीनि। हस्तमुक्तानि चक्रादीनि, यन्त्रमुक्तानि शरादीनि। तेषां सर्व्वेषां युद्धसाधनत्वादा-युधत्वम्। “न मे त्वदन्येन विसोढमायुधम्” रघुः। “येऽपीन्द्रपाणितुलितायुधलूनपक्षाः” माघः। “न सुप्तं न विसन्नाहं न लग्नं न निरायुधम्” मनुः।

**आयुधधर्म्मिणी** स्त्री आयुधस्येव धर्मोऽस्त्यस्या इनि ङीप्। जयन्तीवृक्षे शब्दच०। सा हि रोगनाशने आयुधसमा

**आयुधन्यास** पु० आयुधानां न्यासः तत्तत्स्थानस्पर्शपूर्व्वकं तत्तन्मन्त्राणामर्पणबुद्ध्या स्थापनम्। श्रीविद्यापूजाङ्गे “एवं कामकलारूपं देवतामयमात्मनः। वपुर्विचिन्त्य शिव-योरायुधन्यासमाचरेत्” इत्यादिना ज्ञानार्णवोक्ते न्यासभेदे। तन्त्रसारे श्रीविद्यापूज्याप्रकरणे विवृतिर्दृश्या।

**आयुधागार** न० ६त०। राज्ञां प्रहरणस्थापनार्थे गृहे। “सस्तृद्धमायुधागारमिदं तस्य दुरात्मनः”। “आयुधागार-मादीप्य” इति च भा०आ०प०१४७,४८ अ०। “कोष्ठा-गारायुधागारदेवतागारभेदकान्” मनुः। आयुधागारे नियुक्तः ठक्। आयुधागारिकः तत्रनियुक्ते त्रि०। तत्र-त्यप्रयुक्तं मात्स्ये। “स्थापनाजातितत्त्वज्ञः सततं प्रति-जागृतः। राज्ञः स्यादायुधागारे दक्षः कर्म्मसु चोद्यतः”।

**आयुधिक** पु० आयुधेन तद्व्यवहारेण जीवति ठञ्। शस्त्राजीवे पक्षे छ आयुधीयोऽप्यत्र। आयुधाजीवादयोऽप्यत्र।

**आयुधिन्** पु० आयुधमस्त्यस्य इनि। शस्त्रधारके।

**आयुध्य** न० युद्ध्यति युध-क न०त० ततो भावे अचतुरा-दिपाठात् ष्यञ् न त्वतलौ। १योद्धृभिन्नत्वे। आ+युध-ल्यप्। २सम्यग्युद्धं कृत्वेत्यर्थे अव्य०।

**आयुर्दाय** पु० आयुषोदायः दानम्। बलविशेषस्थितियोगा-दिभिः ज्योतिषोक्तै रव्यादिभिः आयुषोदाने तद्विवरणं श्रीपतिपद्धतौ यथा

“आयुर्ज्ञानादेव होराफलानां कर्त्तुं यस्मान्निर्णयः शक्य-तेऽत्र। आयुर्दायः संप्रदायागतोऽयं सच्छिष्याणां प्रीतये कथ्यतेऽत्र। एकोनदीधितिसमादिह गच्छतो यद्रूपादि-रूपचयसंकलितद्वयं स्यात्। चेष्टोच्चरश्मिजमथ स्वमरी-चिभक्तं तज्जायतेऽत्र गुणकद्वितयं तदाख्यम्। जने भवे तां निजदीधितिभ्यः श्रेढीफले ते यदि रश्मियुक्ते। तदर्द्धिते स्वांशुभिरुद्धृते ते तद्घातमूलं गुणकः स्फुटः स्यात्”। इति गुणकानयनमत्रायं भेदस्तट्टीकायामुक्तः। “अल्पाश्चेत् किरणाः सैकास्तत्तुभक्ता भवेद्गुणः। अधिकाश्चेन्निरेकास्ते दलिता गुणको भवेत्” “वर्गोत्तमे स्वभवने स्वनवांशके च स्वत्र्यंशके च गुणकोद्वितयं निरुक्तः। अध्यर्द्धरूप ३/२ मधिमित्रगृहे सुहृद्भे सत्र्यंशकं ४/३ समगृहे खलु रूपमेव। त्र्यंशोनितं २/३ रिपुगृहेऽध्यरिभे दलं १/२ स्यादेभ्योगुणो-भवति यः खलु कश्चिदेकः। वेदोद्धृतः समगुणोगुणकैः प्रदि-ष्टोहोरादिवर्गगुणकस्तु भवेत्तदर्द्धम्। एतेऽपि गुणयागदि-तामहद्भिरपेक्षयानन्तर ताड़कानाम्। ७नगांशका ११रुद्र-मिताद्यभीष्टराशौ सुहृद्भे ब्रह्मानि मूर्च्छनांशाः। १९नवाश्विनो १रूपसुदासराशौ २१कुद्व्यंशका १३विश्वसमा द्विषद्भे। त्रयो नगांशा अधिशत्रुराशावेते भसंज्ञाश्च राशिवर्जम्। वर्गोत्तमात्मीजभा नवत्रिभागस्थिते ग्रहे तु द्वितयं २गुण-श्चेत्। एतैरभीष्टादिगुणैर्निहन्यादुदीरितैराशिगुणं पुन-स्तम्। गृहादिके वर्गगणे स्वकीये द्विकोगुणस्त्रिंशविवर्ज्जितः सः। अभीष्टभे मित्रगृहे नवांशा त्रिश्वोऽथ रूपञ्च समस्य गेहे। नवांशकाः पञ्च विरोधराशौ गुणांशकः स्यादधिवै-रिणोभे। पूर्वम्प्रपूर्व्वागुणकाय उक्ता वर्गेषु सप्तस्विह गु-णयसंज्ञाः। गुणयागुणैस्तैस्त्वधिकारलब्धैरुक्तै गुणैः स्यादथ भिन्नितैस्तैः। स्फुतोबुधैराश्रयसंज्ञितोऽयमस्य स्फुटस्यापि